इति वैद्यकचक्रपाणिसंग्रहे स्नुक्रोगाधिकारे ॥)
तत्समूहार्थवाचकाः शब्दाः यथा,—
"वालाः स्युस्तत्पराः पाशो रचनाभार उच्चयः ।
हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः" ॥
इति हेमचन्द्रः ॥ * ॥ (कस्य जलस्य ईशः ।) वरुणः । ह्रीवेरम् । इति मेदिनी ॥ (अस्य पर्य्याया यथा,—
"वालं ह्रीवेरवर्हिष्ठोदीच्यं केशाम्बुनाम च" ॥
इति वैद्यकरत्नमालायाम् ॥) दैत्यविशेषः । इति हेमचन्द्रः ॥ (कस्य ब्रह्मणोऽपि ईशः । के जले शेते वा ।) विष्णुः । इति शब्दरत्नावली । (काशते प्रकाशते लोके लोकं काशयति वा । काश + अच् पृषोदरात् एवं साधुः । सूर्य्याग्निप्रभृतिरश्मिः ।
"ब्रह्म-विष्णु-रुद्र-संज्ञाः शक्तयः केशसंज्ञिताः" ॥
इति भागवतोक्तेः परब्रह्मशक्तिः । ब्रह्मा ।
"केशो योनौ तथा भावे ह्यवलावण्ययोरपि ।
सम्पटे पुरुषे चैव प्रमदायां विशेषतः" ॥
"प्रजापतौ कचे चैव केशशब्दः प्रकीर्त्त्यते" ॥
इति महाभारतटीकायां नीलकण्ठः ॥)

केशकलापः, पुं, (केशानां कलापः समूहः ।) केशपाशः । केशसमूहः । इति हेमचन्द्रः ॥

केशकारः, पुं, (केशं केशवत् केशाकृतिं वा करोति आत्मानं केशाकारेण वर्द्धयति इति भावः । केश + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इक्षुभेदः । करिया कुशियार इति हिन्दी भाषा । अस्य गुणाः । गुरुत्वम् । शीतलत्वम् । रक्तपित्तक्षयापहत्वञ्च । इति भावप्रकाशः ॥

केशगर्भकः, पुं, (केशो गर्भे अभ्यन्तरेऽस्य । कप् ।) कवरी । इति त्रिकाण्डशेषः ॥

केशघ्नं, क्ली, (केशं हन्ति नाशयतीति । हन् + टक् ।) इन्द्रलुप्तकम् । इति हेमचन्द्रः ॥

केशच्छित्, [द्] पुं, केशं छिनत्ति । छिद् + क्विप् ।) नापितः । इति शब्दमाला ॥

केशटः, पुं, (को ब्रह्मा ईशः महादेवः तौ अटतः गच्छतः प्रलये यं । महाप्रलये सूर्य्यविशेषात् तथात्वम् । यद्वा ब्रह्मशिवाभ्यां अटति गच्छति यः सः । तयोरात्मैकात्मत्वात् ।) विष्णुः । (केशेषु काशादित्वगन्तेषु अटति चरतीति । अट + अच् । शकन्ध्वादित्वात् साधुः ।) छागः । (केशेषु मूर्द्धजेषु अटतीति । अट् + अच् शकन्ध्वादित्वात् अलोपे साधुः ।) यूकाः । इति मेदिनी । भाता । इति शब्दरत्नावली ॥ (केशेषु कामार्त्तपुरुषनारीषु अटति । अट् + अच् ।) कामदेवस्य शोषणवाणः । इति विश्वः । (केश इव प्रतिमासु नटनच्चादिषु च अटति त्वगात्मनेति यावत् ।) शोणकवृक्षः । इति त्रिकाण्डशेषः ॥

केशधृत्, पुं, (केशमिव धरति । धृ + क्विप् ।) भूतकेशनामकवृक्षभेदः । इति शब्दचन्द्रिका ॥

केशनाम, [न्] क्ली, (केशनामैव नाम यस्य ।) वालम् । इत्यमरः ॥ वाला इति भाषा ॥

केशपक्षः, पुं, (केशानां पक्षः समूहः । बाहुलकात् पक्षाटेर्णा वा ।) केशपाशः इत्यमरः । २ । ६ । ९८ ॥ (यथा, महाभारते । ४ । ३६ । ४१ ।
"उत्तरन्तु प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शतपदं तूर्णं केशपक्षे परामृशत्" ॥)

केशपर्णी, स्त्री, (केश इव पर्णान्यस्य । जातित्वात् ङीष् ।) अपामार्गः । इति शब्दरत्नावली ॥

केशपाशः, पुं, (केशानां पाशः समूहः ।) केशसमूहः । यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ॥
इत्यमरः । २ । ६ । ९८ ॥ (यथा, कुमारे । १ । ४८ ।
"तं केशपाशं प्रसमीक्ष्य कुर्य्युः
र्वालप्रियत्वं शिथिलं चमर्य्यः" ॥)

केशपाशी, स्त्री, (केशपाश + स्वाङ्गात् ङीप् ।) शिरोमध्यस्थशिखा । चूडा । इत्यमरः । २ । ६ । ९७ ॥

केशभूः, पुं, (केशानां भूरुत्पत्तिस्थानम् ।) शिरः । इति राजनिर्घण्टः ॥

केशमथनी, स्त्री, (केशा मथ्यन्ते ऽनया । मथ विलोड़ने + करणे ल्युट् ततो ङीप् । अस्याः कण्टकैः समीपं गन्तुः केशोत्पाटनात् तथात्वम् ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

केशमार्जकं, क्ली, (केशं मार्ष्टि । मृज शोधने + कर्त्तरि ण्वुल् ।) कङ्कतिका । इति जटाधरः । चिरुणी इति भाषा ॥

केशमार्जनं, क्ली, (केशो मृज्यतेऽनेन । मृज् + करणे ल्युट् इडिच्च ।) कङ्कतिका । इति हेमचन्द्रः । केशशुद्धिश्च । (भावे ल्युट् । केशशोधनक्रियामात्रम् ॥)

केशमुष्टिः, पुं, (केशानां मुष्टिरिव ।) विषमुष्टिवृक्षः । महानिम्बः । इति राजनिर्घण्टः ॥

केशरः, पुं क्ली, (के जले पद्मशिरसि वा । सरतीति । सृ + अच् । पृषोदरात् शत्वम् । यद्वा केश इव केशाकारः अस्यास्तीति । केश + रः ।) किञ्जल्कः । इत्यमरः । १ । १० । ४३ ॥

केशरः, पुं, (केश इव केशाकृतिपदार्थः अस्यास्तीति मत्वर्थीयो रः ।) नागकेशरवृक्षः । (यथा,—गीतगोविन्दे । १ । ३१ । "मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे" ॥ वकुलवृक्षः । (यथा, कुमारे । ३ । ५५ ।
"स्रस्तां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम्" ॥)
पुन्नागवृक्षः । (यथा, महाभारते । १ । १२५ । ३ ।
"पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।
कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः" ॥)
सिंहजटा । इति मेदिनी ॥ (यथा, कादम्बर्य्याम् "मृगपतिरिव स्कन्धावलम्बितकेशरभारः" ॥) हिङ्गुवृक्षः । इत्यमरटीकायां भरतः ॥ नीपः । केलिकदम्ब इति भाषा । यथा, मेघदूते । २२ ।
"नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढ़ैः" ॥)

केशरञ्जनः, पुं, (केशान् रञ्जयति । रन्ज + णिच् + ल्युः ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः । भीमराज इति भाषा ॥

केशराजः, पुं, (केशो राजतेऽनेन । राज + करणे घञ् ।) शाकभेदः । केशरे इति भाषा । तत्पर्य्यायः । भृङ्गराजः २ भृङ्गः ३ पतङ्गः ४ मार्कवः ५ । इति रत्नमाला ॥ मार्कवः ६ । इत्यमरः ॥ नागभारः ७ पवनः ८ भृङ्गसोदरः ९ । इति त्रिकाण्डशेषः ॥ केशरञ्जनः १० केशः ११ । कुन्तलवर्द्धनः १२ । इति वैद्यकम् ॥ भृङ्गारकः १३ एकरजः १४ करञ्जकः १५ भृङ्गरजः १६ भृङ्गारः १७ । इति जटाधरः ॥ अङ्गारः १८ भृङ्गरजाः १९ मकरः २० । इति शब्दरत्नावली ॥ अपि च ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहृत् ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । अग्निकारित्वम् । केशचक्षुर्हितत्वम् । पाण्डुकफापहत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥

केशराम्लः, पुं, (केशरे तदवच्छेदे अम्लरसो यस्य ।) मातुलुङ्गवृक्षः । इति जटाधरः ॥

केशरी, [न्] पुं, (केशराः सन्त्यस्य इति इनिः ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ (यथा, रघुवंशे २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श" ॥)
घोटकः । पुन्नागवृक्षः । नागकेशरवृक्षः । इति मेदिनी ॥ वीजपूरकवृक्षः । इति जटाधरः ॥

केशरुहा, स्त्री, (केश इव रोहति अच् । केशरुह + "इगुपधेति" । ३ । १ । १३५ । इति कः ।) भद्रदन्तिकावृक्षः । इति राजनिर्घण्टः ॥

केशरूपा, स्त्री, (केशवद्रूपमस्याः ।) वन्दाकवृक्षः । इति राजनिर्घण्टः । (परगाछा इति भाषा ॥)

केशवः, पुं, (को ब्रह्मा ईशः रुद्रः तौ आत्मनि स्वरूपे वयति प्रलये उपाधिरूपमूर्त्तित्रयं मुक्ता एकमात्रपरमात्मस्वरूपेणावतिष्ठते इति । यथा, भागवते २ अध्याये चतुःश्लोक्याम् ।
"अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि
तद्विद्यादात्मनो मायां यथाभासो यथातमः ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्" ॥
तथा, केशं केशिनं वाति हन्ति । केश + वा + कः । यथा, हरिवंशे । ८० । ६६ ।
"यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु ।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि" ॥
यद्वा, के जले शववत् भातीति । प्रलयकाले क्षीरोदशायितया तथात्वम् । कश्च अश्च ईशश्च ते केशा ब्रह्मविष्णुरुद्राः नियम्यतया सन्त्यस्य । यद्वा, कश्च ईशश्च तौ केशौ पुत्रत्वेन भवतो ऽस्य । "केशाद्वोऽन्यतरस्याम्" । ५ । २ । १०९ ।